श्रीगणेशाय नमः ।

अथ विष्णुतन्त्रम् ।


अथ श्रीविष्णुध्यानम् ।

शान्ताकारम्भुजगशयनम्पद्मनाभंसुरेशँविश्वाधारङ्गगनसदृ
शम्मेघवर्ण्णंशुभाङ्गम्॥ लक्ष्मीकान्तङ्कमलनयनँयोगिभिर्द्ध्या
नगम्यँवन्देविष्णुम्भवभयहरंसर्व्वलोकैकनाथम् ॥ १ ॥



अथयन्त्रोद्धारः ।

अनुक्तकल्पेयन्त्रन्तुलिखेत्पद्मदलाष्टकम् ॥
षट्कोणकर्ण्णिकन्तत्रवेदद्वारोपशोभितम् ॥



अथमन्त्रोद्धारः ।

सचतुर्थीनमोन्तैश्चनामभिर्व्विन्यसेत्सुधीः ॥ तारब्रम ५ पदम्भूया न्नरौदीर्घसमन्वितौ॥यवर्ण्णोंणायमन्त्रोयम्प्रोक्तोवस्वक्षर ५ परः॥

अथमन्त्रः ।

ॐनमोनारायणाय ।

अथपूजाप्रयोगः ।

प्रात ५ कृत्यादिमातृकान्यासान्तङ्कर्म्मविधायकेशवकृत्यादि न्यासङ्कुर्य्यात् ॥ ॥ अथऋष्यादिन्यासः॥शिरसिप्रजापतयेऋ षयेनमः ॥ मुखेगायत्रीछन्दसेनमः ॥ हृदिअर्द्धलक्ष्मीहरये दे वतायैनमः ॥ तत ५ कराङ्गन्यासौ ॥ श्रीअङ्गुष्ठाभ्यान्नमइत्या दि ॥ तथाचगौतमीये ॥ ऋषि ५ प्रजापति ५ छन्दोगायत्रीदेव तापुनः ॥ अर्द्धलक्ष्मीहरि ५ प्रोक्तःश्रींबीजेनाङ्गकल्पनेति ॥ त तोध्यानम् ॥ उद्यत्प्रद्योतनशतरुचिन्तप्तहेमावदातम्पार्श्वद्वन्द्वे जलधिसुतयाविश्वधात्र्याचपुष्टम् ॥ नानारत्नोल्लसितविविधा कल्पमापीतवस्त्रँव्विष्णुव्वन्देदरकमलकौमोदकीचक्रपाणिम् ॥ एवन्ध्यात्वान्यसेत् ॥वर्ण्णान्मुक्तासार्द्धचन्द्रानितिदर्शनात्॥अं केशवकृत्यैनमोललाटे ॥ आंनारायणायकान्त्यैनमोमुखे ॥ इं माधवायपुष्ट्यैनमोदक्षनेत्रे ॥ ईंगोविन्दायपुष्ट्यैनमोवामनेत्रे ॥ नमःसर्व्वत्र॥उंविष्णवेधृत्यै० दक्षकर्ण्णे ॥ ऊंमधसूदनायशान्त्यै० वामकर्ण्णे । ऋंत्रिविक्रमाय क्रियायै०दक्षनासापुटे।ॠंवामनायद यायै० वामनासापुटे । लृंश्रीधरायमेधायै०दक्षगण्डे । लॄंहृषीके शायदुर्ग्गायै०वामगण्डे । एंपद्मनाभायश्रद्धायै०ओष्ठे । ऐंदामो दरायलज्जायै०अधरे । ओं वासुदेवायलक्ष्म्यै०ऊर्द्धदन्तपङ्क्तौ ॥ औं सङ्कर्षणायसरस्वत्यै० अधोदन्तपङ्क्तौ । अंप्रद्युम्नायधृत्यै०

मस्तके। अःअनिरुद्धायरत्यै० मुखे। कंचक्रिणेजयायै०खंग दिनेदुर्ग्गायै० गंशार्ङ्गिणेप्रभायै० घंखड्गिनेसत्यायै० ङंशङ्खिनेचन्द्रायै० दक्षकरमूलसन्ध्यग्रकेषु॥ चंहलिनेवाण्यै० छं मुसलिने विलासिन्यै० जंशूलिने विजयायै० झंपाशिनेविरजायै० ञंअङ्कुशिनेबिम्बायै० वामकरमूलसन्ध्यग्रकेषु॥ टंमुकुन्दाय विनदायै० ठंनन्दजाय सुनन्दायै० डंनन्दिनेस्मृत्यै० ढंनराय ऋद्धयै० णंनरकजितेसमृद्धयै० दक्षपादमूलसन्ध्यग्रकेषु॥ तंहरयेशुद्धयै०थंकृष्णायवृद्धयै०दंसत्यायभूम्यै० धंसात्वतायमत्यै० नंसौराष्ट्रायक्षमायै० वामपादमूलसन्ध्यग्रकेषु॥ पंशूराय रमायै० दक्षपार्श्वे। फंजनार्दनाय उमायै० वामपार्श्वे। वंभूधराय क्लेदिन्यै० पृष्ठे।भंविश्वमूर्त्तये क्लिन्नायै० नाभौ।मंवैकुण्ठायवसुदायै० उदरे। यंत्वगात्मनेपुरुषोत्तमायवसुधायै० हृदि। रंअसृगात्मनेबलिनेपरायै० दक्षांसे। लंमांसात्मनेबालानुजायपरायणायै०ककुदि। वंमदआत्मनेबलायसूक्ष्मायै०वामांसे। शंअस्थ्यात्मनेवृषघ्नायसंधायै० हृदादिदक्षकरे। षंमज्जात्मनेवृषायग्रज्ञायै० हृदादिवामकरे॥ संशुक्रात्मने हंसायप्रभायै० हृदादिदक्षपादे। हंप्राणात्मनेवराहायनिशायै०हृदादिवामपादे।लंजीवात्मनेविमलायअमोघायै० हृदाद्युदरे। क्षंक्रोधात्मने नृसिंहायविद्युतायै० हृदादिमुखे॥तथाचगौतमीये॥ केशवादिरयन्न्यासोन्यासमात्रेणदेहिनाम्॥अच्युतत्वन्ददात्येवसत्यंसत्यन्नसंशयः॥ मातृकार्ण्णं समुच्चार्य्य केशवाय इति स्मरेत्॥ कीर्त्त्यैचनमसायुक्तमित्यादिन्यासमाचरेत्॥ केशवायतत×कीर्त्त्यैकान्त्यैनारायणायच॥ इत्याद्यगस्त्यसंहितावचनाच्चायंक्रमः॥ नतुकेशवकीर्त्तिभ्यान्नमइत्यादि॥ तथाभुक्तिमुक्तिमिच्छताऽयन्न्यास×कर्त्तव्यःश्रीबीजादि॥ यथा॥श्रीं अं केशवायकीर्त्यैनम

इत्यादि ॥ अथोपचारक्रमेणपूजा ॥ अथावाहनम् ॥ यस्यदर्शं नमिच्छन्तिदेवाःस्वाभीष्टसिद्धये ॥ कृपयादेवदेवेशमदग्रेसन्नि धीभव ॥ यस्यतेपरमेशानस्वागतंस्वागतम्प्रभो ॥ कृतार्थोनुगृ हीतोऽस्मिसफलंजीवनम्मम ॥ यदागतोऽसिदेवेशचिदानन्दमया व्यय ॥ अज्ञानाद्वाप्रमादाद्वा वैकल्पात्साधकस्यच ॥ यदपूर्ण म्भवेत्कृत्यन्तथाप्यभिमुखोभव ॥ इत्यावाहनम् ॥ अथपाद्यम् ॥ ॥ यद्भक्तिलेशसम्पर्कात्परमानन्दसम्भवः ॥ तस्मैतेपरमेशान पाद्यंशुद्धायकल्पये ॥ इतिपाद्यम् ॥ अथाचमनम् ॥ देवाना मपिदेत्रायदेवानान्दैवतायच॥आचामङ्कल्पयामीशस्वधयाशुद्धि हेतवे ॥ इत्याचमनम् ॥ अथार्घ्यम् ॥ तापत्रयहरन्दिव्यम्पर मानन्दलक्षणम् ॥ तापत्रयविमोक्षायतवार्घ्यङ्कल्पयाम्यहम् ॥ इत्यर्घ्यम् ॥अथमधुपर्कम् ॥ सर्व्वकालुष्यहीनायपरिपूर्णसुधा त्मकम्॥मधुपर्कमिमन्देवकल्पयामिप्रसीदमे ॥ इतिमधुपर्कम् ॥ अथपुनराचमनीयम् ॥ उच्छिष्टोप्यशुचिर्व्वापियस्यस्मरणमात्र तः ॥ शुद्धिमाप्नोतितस्मैतेपुनराचमनन्त्विदम् ॥ इतिपुनराच मनीयम् ॥ अथाभ्यङ्गम् ॥ गन्धतैलङ्गृहीत्वापठेत् ॥ स्नेहङ्गृहाण स्नेहेनलोकनाथमहाशय ॥ सर्व्वलोकेषुशुद्धात्मन्ददामिस्नेहमु त्तमम् ॥ इत्यभ्यङ्गम् ॥ अथस्नानम् ॥ ॐसहस्रशीर्ष्णापुरुषः सहस्राक्षःसहस्रपात् ॥ सभूमिर्ठ्सर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषएवेदर्ठ् सर्व्वंय्यद्भूतय्यँच्चभाव्यम् ॥ उतामृतत्त्व स्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमातोज्या याँश्च पूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ॥ ३ ॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततोवि ष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥ ततोव्विराडजायतव्वि राजोऽअधिपूरुषः ॥ सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥५॥

तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रे वायव्यानारण्याग्राम्याश्चये ॥ ६ ॥ तस्माद्यज्ञात्सर्व्वहुतऽ ऋचः सामानिजज्ञिरे ॥ छन्दा ७ सिजज्ञिरे तस्माद्यजुस्त स्मादजायत ॥ ७ ॥ तस्मादश्वाऽअजायन्तयेकेचोभयादतः ॥ गावोहजज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ॥ ८ ॥ तय्यँज्ञम्बर्हि षिप्रौक्षन्पुरुषञ्जातमग्रतः ॥ तेनदेवाऽअयजन्तसाद्ध्याऽऋषय श्चये ॥ ९ ॥ यत्पुरुषँव्यँदधुःकतिधाव्यकल्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥ १० ॥ ब्राह्मणोऽस्य मुखमासीद्बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यःपद्भ्याँशूद्रोऽअजायत ॥ ११ ॥ चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत ॥ श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआ सीदन्तरिक्षठँशीर्ष्णोद्यौःसमवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशः श्रो त्रात्तथालोकाँ२॥ऽअकल्पयन् ॥ १३ ॥ यत्पुरुषेणहविषादेवायज्ञम तन्वत ॥ वसन्तोऽस्यासीदाज्यङ्ग्रीष्मऽइध्मः शरद्धविः ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधःकृताः ॥ देवायद्यज्ञन्तन्वा नाऽअवध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदेवास्ता निधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महिमानःसचन्तयत्र पू र्व्वेसाध्याः सन्तिदेवाः ॥ १६ ॥ अथतान्त्रिकमन्त्राः ॥ परमान न्दबोधाब्धिनिमग्ननिजमूर्त्तये ॥ साङ्गोपाङ्गमिदंस्नानङ्कल्पयाम्य हमीशते ॥ इतिस्नानम् ॥ अथवासः ॥ मायाँव्विनानतेजन्म निजगूहोरुतेजसे ॥ निरावरणविज्ञायवासस्तेकल्पयाम्यहमिति वासः ॥ यमाश्रित्यमहामायाजगत्सम्मोहिनीतुसा ॥ तस्मैतेप रमेशानकल्पयाम्युत्तरीयकम् ॥ अथयज्ञसूत्रम् ॥ यस्यश क्तित्रयेणेदं सम्प्रोक्तमखिलञ्जगत् ॥ यज्ञसूत्रायतस्मैतेयज्ञसू त्रम्प्रकल्पयेत् ॥ इतियज्ञसूत्रम् ॥ अथभूषणम् ॥ स्व

भावसुन्दराङ्गाय सत्यासत्याश्रयायते ॥ भूषणानिविचित्राणिक ल्पयामिसुरार्च्चित ॥ इतिभूषणम् ॥ अथजलम् ॥ समस्तदेव देवेशसर्व्वतृप्तिकरम्परम् ॥अखण्डानन्द सम्पूर्ण्णङ्गृहाणजलमुत्त मम् ॥ इतिजलम् ॥ अथगन्धम् ॥ परमानन्दसौरभ्यपरिपूर्ण्णदि गन्तरम् ॥ गृहाणपरमङ्गन्धङ्कृपया परमेश्वर॥ इतिगन्धम् ॥ अ थपुष्पम् ॥ तुरीयगुणसम्पन्ननानागुणमनोहरम् ॥ आनन्दसौर भम्पुष्पङ्गृह्यतामिदमुत्तमम् ॥ इतिपुष्पम् ॥ अथधूपः ॥ वन स्पतिरसोत्पन्नोगन्धाढ्योगन्धउत्तमः ॥ आघ्रेयः सर्व्वदेवानान्धू पोऽयम्प्रतिगृह्यताम् ॥ इतिधूपः॥अथदीपः ॥ सुप्रकाशोमहादीपः सर्व्वतस्तिमिरापहः ॥ सबाह्याभ्यन्तरज्योतिर्दीपोयम्प्रतिगृह्यता म् ॥ इतिदीपः ॥ अथनैवेद्यम् ॥ सत्पात्रसिद्धं सहविर्व्विविधानेक भक्षणम् ॥ निवेदयामिदेवेशसानुगायगृहाणतत् ॥ इतिनैवेद्यम् ॥ अथाचमनार्त्थजलम् ॥ समस्तदेवदेवेशसर्व्वज्ञप्तिकरम्परम् ॥ अखण्डानन्दसम्पूर्ण्णङ्गृहाणजलमुत्तमम् ॥इतिजलम् ॥अथताम्बू लम्॥ताम्बूलञ्चवरन्दिव्यङ्कर्प्पूरादिसुवासितम्॥मयानिवेदितम्भ क्त्यागृहाणपरमेश्वर ॥ इतिताम्बूलम्॥इतिपूजा ॥ ७ ॥

अथस्तोत्रम् ।

आदायवेदान्सकलान्समुद्रान्निहत्यचोन्मथ्यमधुंह्रदग्रम् ॥ दत्ता४पुरायेनपितामहायविष्णुन्तमाद्यम्भजमत्स्यरूपम् ॥ १ ॥ दिव्यामृतार्थम्मथितेमहाब्धौदेवासुरैर्व्वासुकिमन्दराभ्याम् ॥ भूमेर्म्महावेगविघूर्ण्णितायान्तङ्कूर्म्मंमाधारगतन्नमामि ॥ २ ॥ समुद्रकाञ्चीसरिदुत्तरीयावसुन्धरामेरुकिरीटभारा ॥ दंष्ट्राग्रतो येनसमुद्धृताभूस्तमादिकोलंशरणम्प्रपद्ये ॥ ३ ॥ भक्तार्त्तिभङ्गश्च मयाधिपायस्तम्भान्तरालादुदितोनृसिंहः ॥ रिपुंसुराणान्निशि

तैर्न्नखाग्रैर्व्विदारयन्तन्नचविस्मरामि ॥ ४ ॥ चतुस्समुद्राभरणा धरित्रीन्यासायनालञ्चरणस्ययस्य ॥ एकस्यनान्यस्यपदंसुरा णान्त्रिविक्रमंसर्व्वगतन्नमामि ॥ ५ ॥ त्रिस्सप्तकृत्वोनृपतीन्नि हत्ययस्तर्प्पणंरक्तमयम्पितृभ्यः ॥ चकारदोर्द्दण्डबलेनसम्यक्तमा दिशूरम्प्रणमामिरामम् ॥ ६ ॥ कुलेरघूणांसमवाप्यजन्मवि धायसेतुञ्जलधेर्ज्जलान्तः ॥ लङ्केश्वरय्यः शमयाञ्चकारसीतापति न्तम्प्रणमामिभक्त्या ॥७॥ हलेनसर्व्वानसुरान्निकृष्यचकारचूर्ण म्मुसलप्रहारैः ॥ यꣳकृष्णमासाद्यबलम्बलीयान्भक्त्याभजेतम्ब लभद्रामम् ॥ ८ ॥ पुरासुराणामसुरान्विजेतुंसम्भावयच्छ्रीवर चिह्नवेषम् ॥ चकारयःशास्त्रममोघकल्पन्तम्मूलभूतम्प्रणतो स्मिबुद्धम् ॥ ९ ॥ कल्पावसानेनिखिलैःसुरैस्स्वैस्सङ्घट्टया मासनिमेषमात्रात् ॥ यस्तेजसास्वेनददाहभीमोविष्ण्वात्मक न्तन्तुरगम्भजामः ॥ १० ॥ शङ्खंसुचक्रंसुगदांसरोजन्दोर्ब्भिर्द धानङ्गरुडाधिरूढम् ॥ श्रीवत्सचिह्नञ्जगदादिमूलन्तमालनीलंह दिविष्णुमीडे ॥ ११ ॥ क्षीराम्बुधौशेषविशेषतल्पेशयानमन्तः स्मितशोभिवक्त्रम् ॥ उत्फुल्लनेत्राम्बुजमम्बुदाम्भसामाद्यंश्रुती नामसकृत्स्मरामि ॥ १२ ॥ प्रीणयेदनयास्तुत्याजगन्नाथञ्जगन्म यम् ॥ धर्म्मार्त्थकाममोक्षाणामाप्तयेपुरुषोत्तमम् ॥ १३ ॥ इतिश्रीविष्णुस्तोत्रंसमाप्तम् ॥

अथकवचम्।

श्रीनारदउवाच ॥ भगवन्सर्व्वधर्म्मज्ञकवचय्यत्प्रकाशित म् ॥ त्रैलोक्यमङ्गलन्नामकृपयाकथयप्रभो ॥ १ ॥ सनत्कुमा रउवाच ॥ शृणुवक्ष्यामिविप्रेन्द्रकवचम्परमाद्भुतम् ॥ नारायणेन कथितङ्कृपयाब्रह्मणेपुरा ॥ २ ॥ ब्रह्मणाकथितम्मह्यम्परस्नेहाद्ब

दामिते ॥ अतिगुह्यतरन्तत्त्वम्ब्रह्ममन्त्रौघविग्रहम् ॥ ३ ॥ यद्धृत्वापठनाद्ब्रह्मासृष्टिंक्वितनुतेध्रुवम् ॥ यद्धृत्वापठनात्पाति महालक्ष्मीर्ज्जगत्त्रयम् ॥ ४ ॥ पठनाद्धारणाच्छम्भुःसंहर्त्तास र्व्वमन्त्रवित् ॥ त्रैलोक्यजननीदुर्ग्गामहिषादिमहासुरान् ॥ ५ ॥ वरदत्ताऽघनैवपठनाद्धारणाद्यतः ॥ एवमिन्द्रादयस्सर्व्वेसर्व्वै श्वर्य्यमवाप्नुयुः ॥ ६ ॥ इदङ्कवचमत्यन्तगुप्तङ्कृत्रापिनोव देत् ॥ शिष्यायभक्तियुक्तायसाधकायप्रकाशयेत् ॥ ७ ॥ श ठायपरशिष्यायदत्त्वामृत्युमवाप्नुयात् ॥ त्रैलोक्यमङ्गलस्यास्य कवचस्यप्रजापतिः ॥ ८ ॥ ऋषिश्छन्दश्चगायत्रीदेवोनाराय णःस्वयम् ॥ धर्म्मार्थकाममोक्षेषुविनियोगःप्रकीर्त्तितः ॥ ९ ॥ प्रणवोमेशिरःपातुनमोनारायणायच ॥ भालम्मेनेत्रयुगलमष्टा र्णोभक्तिमुक्तिदः ॥ १० ॥ क्लीम्पायाच्छ्रोत्रयुग्मञ्चैकाक्षरस्सर्व्व मोहनः ॥ क्लींकृष्णायसदाघ्राणङ्गोविन्दायेतिजिह्विकाम् ॥ गोपी जनपदंव्वल्लभायस्वाहाननम्मम ॥ ११ ॥ अष्टादशाक्षरोमन्त्रः कण्ठम्पातुदशाक्षरः ॥ १२ ॥ गोपीजनपदव्वल्लभायस्वाहाभुज द्वयम् ॥ क्लींग्लौंक्लींश्यामलाङ्गायनमः स्कन्धौदशाक्षरः ॥१३॥ क्लींकृष्णःक्लींकरौपायात्क्लींकृष्णायाङ्गतोऽवतु ॥ हृदयम्भुवने शानीक्लींकृष्णायक्लींस्तनौमम ॥ १४ ॥ गोपालायाग्निजायान्त ङ्कक्षियुग्मंसदावतु ॥ क्लींकृष्णायसदापातुपार्श्वयुग्ममनुत्तमः ॥ १५ ॥ कृष्णगोविन्दकौकट्यांस्मराद्यौडेयुतौमनुः ॥ अष्टा क्षरःपातुनाभिङ्कृष्णेतिद्व्यक्षरोऽवतु ॥ १६ ॥ पृष्ठंक्लींकृष्णक ङ्कालंक्लींकृष्णायद्विठान्तकः ॥ सक्थिनीसततम्पातुश्रींह्रींक्लीं कृष्णठद्वयम् ॥ १७ ॥ ऊरूसप्ताक्षरःपायात्त्रयोदशाक्षरोऽ वतु ॥ श्रींह्रींक्लींपदतोगोपीजनवल्लभदन्ततः ॥ १८ ॥ भा यस्वाहेतिपायुं वैक्लींह्रींश्रींसदशार्ण्णकः ॥ जानुनीचसदापातु

ह्रींश्रींक्लींचदशाक्षरः ॥ १९ ॥ त्रयोदशाक्षरञ्चपातुजङ्घेचक्राद्यु दायुधः ॥ अष्टादशाक्षरोह्रींश्रींपूर्व्वकोविंशदर्ण्णकः ॥ २० ॥ सर्व्वाङ्गम्मेसदापातुद्वारकानायकोवली ॥ नमोभगवतेपश्चाद्वा सुदेवायतत्परम् ॥ २१ ॥ ताराद्योद्वादशार्ण्णोऽयम्प्राच्याम्मांस र्व्वदाऽवतु ॥ श्रींह्रींक्लींचदशार्ण्णस्तुक्लींह्रींश्रींषोडशार्ण्णकः ॥ ॥ २२ ॥ गदाद्युदायुधोविष्णुर्म्मामग्नेर्द्दिशिरक्षतु॥ह्रींश्रींदशाक्षरो मन्त्रोदक्षिणेमांसदावतु ॥ २३ ॥ तारोनमोभगवतेरुक्मिणीवल्ल भायच ॥ स्वाहेतिषोडशार्ण्णोऽयन्नैर्ऋत्यान्दिशिरक्षतु ॥ २४ ॥ क्लींहृषीकेपदेशायनमोमाँवारुणेऽवतु ॥ अष्टादशार्ण्णञ्चकामान्तो वायव्येमांसदावतु ॥ २५ ॥ श्रींमायाकामकृष्णायह्रींगोविन्दा यद्विठोमनुः ॥ द्वादशार्ण्णात्मकोविष्णुरुत्तरेमांसदावतु ॥ २६ ॥ वाग्भावङ्कामंकृष्णायह्रींगोविन्दायतत्परम् ॥ श्रींगोपीजनवल्ल भान्तेभायस्वाहाहसौस्ततः ॥ २७ ॥ द्वात्रिंशत्यक्षरोमन्त्रोमा मैशान्येसदावतु ॥ कालियस्यफणामध्येदिव्यन्नृत्यङ्करोतितम् ॥ ॥ २८ ॥ नमामिदेवकीपुत्रन्नृत्यराजानमच्युतम् ॥ द्वात्रिंश दक्षरोमन्त्रोऽप्यधोमांसर्व्वदावतु ॥ २९ ॥ कामदेवायविद्महेपु ष्पबाणायधीमहि ॥ तन्नोऽनङ्गञ्चप्रचोदयादेषामाम्पातुचोर्द्ध्वतः ॥ ३० ॥ इतितेकथितँव्विप्रब्रह्ममन्त्रौघविग्रहम् ॥ त्रैलोक्य मङ्गलन्नामकवचम्ब्रह्मरूपकम् ॥ ३१ ॥ ब्रह्मणाकथितम्पूर्व्वन्ना रायणमुखाच्छ्रुतम् ॥ तवस्नेहान्मयाऽऽख्यातम्प्रवक्तव्यन्नकस्य चित् ॥ ३२ ॥ गुरुम्प्रणम्यविधिवत्कवचम्प्रपठेत्ततः ॥ सकृ द्विंस्त्रिर्य्यथाज्ञानंसोऽपिसर्व्वतपोमयः ॥ ३३ ॥ मन्त्रेषुसकले ष्वेवदेशिकोनात्रसंशयः ॥ शतमष्टोत्तरञ्चास्यपुरश्चर्य्याविधिः स्मृतः ॥ ३४ ॥ हवनादीन्दशांशेनकृत्वातंत्साधयेद्ध्रुवम् ॥ यदिस्यात्सिद्धकवचोविष्णुरेवभवेत्स्वयम् ॥ ३५ ॥ मन्त्र

सिद्धिर्भवेत्तस्यपुरश्चर्य्याविधानतः ॥ स्पर्द्धामुद्भूयसततँल्लक्ष्मी र्व्वाणीवसेत्ततः ॥ ३६ ॥ पुष्पाञ्जल्यष्टकन्दत्वामूलेनैवपठेत्सकृत् ॥ दशवर्ष्यसहस्राणाम्पूजायाः फलमाप्नुयात् ॥ ३७ ॥ भूर्ज्जे विलिख्यगुटिकांस्वर्ण्णस्थान्धारयेद्यदि ॥ कण्ठेवादक्षिणेबाहौसो ऽपिविष्णुर्न्नसंशयः ॥ ३८ ॥ अश्वमेधसहस्राणिवाजपेयशतानिच ॥ महादानादियान्येवप्रादक्षिण्यम्भुवस्तथा ॥ ३९ ॥ कलान्नार्हन्तितान्येवसकृदुच्चारणात्ततः ॥ कवचस्यप्रसादेनजीवन्मुक्तोभवेन्नरः ॥ ४० ॥ त्रैलोक्यङ्क्षोभयत्येवत्रैलोक्यविजयी भवेत् ॥ इदङ्कवचमज्ञात्वायजेद्यःपुरुषोत्तमम् ॥ शतलक्षप्रजप्तोऽपिनमन्त्रस्तस्यसिद्ध्यति ॥ ४१ ॥ इतिकवचंसमाप्तम् ॥

अथहृदयम् ।

आचम्यप्राणानायम्यदेशकालौस्मृत्वा ॥ ममाभीष्टसिद्ध्यर्थंसङ्कल्पीकरणरीत्यासम्पुटीकरणरीत्यावानारायणहृदयस्यसकृदावर्त्तनङ्करिष्ये ॥ अस्यश्रीनारायणहृदयस्तोत्रमन्त्रस्य ॥ भार्ग्गवऋषिः अनुष्टुप्छन्दः श्रीलक्ष्मीनारायणोदेवता॥ॐबीजम् ॥ नमःशक्तिः ॥ नारायणायेतिकीलकम् ॥ श्रीलक्ष्मीनारायणप्रीत्यर्थेजपेविनियोगः॥ॐनारायणꣳपरज्योतिरित्यङ्गुष्ठाभ्यान्नमःॐनारायणꣳपरम्ब्रह्मेतितर्ज्जनीभ्यां० ॐनारायणꣳपरोदेवइतिमध्यमाभ्यां०ॐनारायणःपरोध्यातेतिअनामिकाभ्यां०ॐनारायणꣳपरन्धामेतिकनि० ॐनारायणꣳपरोधर्म्मइतिकरतलकर०एवंहृदयादि॥अथदिग्बन्धः॥ॐऐंह्यादिदशदिशम्॥ "ॐनमःसुदर्शनायसहस्रारायहूम्फट्वह्निमि नमश्चक्रायस्वाहा" इतिप्रतिदिशंयोज्यम् ॥ अथध्यानम् ॥ उद्यदादित्यसङ्काशम्पीतवाससमच्युतम् ॥ शङ्खचक्रगदापाणिन्ध्यायेल्लक्ष्मीपतिंहरिम् ॥"ॐ

नमोनारायणाय" इतिजपः ॥ अथमूलाष्टकम्॥ॐनारायणꣳपर ञ्ज्योतिरात्मानारायणꣳपरः ॥ नारायणꣳपरम्ब्रह्मनारायणनमो स्तुते॥ १॥नारायणꣳपरोदेवोदातानारायणꣳपरः।नारायणꣳपरो ध्यातानारायणनमोऽस्तुते ॥२॥नारायणꣳपरन्धामध्यानन्नाराय णꣳपरः॥नारायणꣳपरोधम्मोंनारायणनमोस्तुते॥३॥नारायणः परोवेद्योविद्यानारायणꣳपरः॥विश्वन्नारायणस्साक्षान्नारायणनमो ऽस्तुते ॥४ ॥ नारायणाद्विधिर्ज्जातोजातोनारायणाच्छिवः ॥ जा तोनारायणादिन्द्रोनारायणनमोस्तुते ॥ ५ ॥ रविर्न्नारायण न्तेजश्चान्द्रन्नारायणम्महः ॥ वह्निर्न्नारायणःसाक्षान्नारायणनमो ऽस्तुते ॥ ६ ॥ नारायणउपास्यःस्याद्गुरुर्न्नारायणꣳपरः ॥ ना रायणꣳपरोबोधोनारायणनमोस्तुते ॥ ७ ॥ नारायणꣳफलम्मु ख्यंसिद्धिर्न्नारायणःसुखम् ॥ सेव्योनारायणश्शुद्धोनारायणन मोऽस्तुते ॥ ८ ॥ इतिमूलाष्टकम् ॥ अथप्रार्थनादशकम् ॥ नारायणस्त्वमेवासिदहराख्येहृदिस्थितः॥ प्रेरकꣳप्रेर्य्यमाणाना न्त्वयाप्रेरितमानसः ॥ १ ॥ त्वदाज्ञांशिरसाधृत्वाजपामिजन पावनम् ॥ नानोपासनमार्ग्गाणाम्भावहृद्भावबोधकः ॥ २ ॥ भावार्थकृद्भावभूतोभावसौख्यप्रदोभव ॥ त्वन्मायामोहितँविश्व श्वन्त्वयैवपरिकल्पितम् ॥ ३ ॥ त्वदधिष्ठानमात्रेणसैषासर्व्वार्थ कारिणी ॥ त्वमेवताम्पुरस्कृत्य ममकामान्त्समर्प्पय ॥ ४ ॥ नमेत्वदन्यस्त्राताास्तित्वदन्यन्नहिदैवतम् ॥ त्वदन्यन्नहिजाना मिपालकम्पुण्यरूपकम् ॥ ५ ॥ यावत्सांसारिकोभावोमन स्थोभावनात्मकः ॥ तावत्सिद्धिर्भवेत्साध्यासर्वथासर्व्वदाविभो ॥ ॥ ६ ॥ पापिनामहमेवाग्र्योदयालूनान्त्वमग्रणीः ॥ दयनीयो मदन्योऽस्तितवकोऽत्रजगत्त्रये ॥ ७ ॥ त्वयाप्यहन्नसृष्टश्चेन्न स्यात्तवदयालुता ॥ आमयोनैवसृष्टश्चेद्दौषधस्यवृथोदयः ॥ ८ ॥

पापसङ्घपरिक्रान्तःपापात्मापापरूपधृक् ॥ त्वदन्यःकोऽत्रपापेभ्यस्त्रातामेजगतीतले ॥ ९ ॥ त्वमेवमाताचपितात्वमेवत्वमेवबन्धुश्चसखात्वमेव ॥ त्वमेवविद्याचगुरुस्त्वमेवत्वमेवसर्व्वम्मम देवदेव ॥ १० ॥ प्रार्थनादशकञ्चैवमलाष्टकमुदाहृतम् ॥ यः पठेच्छृणुयान्नित्यन्तस्यलक्ष्मीःस्थिराभवेत् ॥ ११ ॥ नारायणस्यहृदयंसर्व्वाभीष्टफलप्रदम् ॥ लक्ष्मीहृदयकंस्तोत्रंय्यादिचेत्तद्विनाकृतम् ॥ १२ ॥ तत्सर्वन्निष्फलम्प्रोक्तंलक्ष्मीःक्रुद्धयति सर्व्वदा ॥ एतत्सङ्कलितंस्तोत्रंसर्व्वकर्म्मफलप्रदम् ॥ १३ ॥ लक्ष्मीहृदयकञ्चैवतथानारायणात्मकम् ॥ जपेद्यःसङ्कलीकृत्य सर्व्वाभीष्टमवाप्नुयात् ॥ १४ ॥ नारायणस्यहृदयमादौजप्त्वात तःपरम् ॥ लक्ष्मीहृदयकंस्तोत्रञ्जपेन्नारायणम्पुनः ॥ १५ ॥ पुनर्न्नारायणञ्जप्त्वापुनर्लक्ष्मीकृतञ्जपेत् ॥ पुनर्न्नारायणञ्जाप्यंसङ्कलीकरणम्भवेत् ॥ १६ ॥ एवम्मध्येद्विवारेणजपेत्सङ्कलितंहितत् ॥ लक्ष्मीहृदयकंस्तोत्रंसर्व्वकामप्रकाशितम् ॥ १७ ॥ तद्वज्जपादिकङ्कुर्य्यादेतत्सङ्कलितंशुभम् ॥ सर्व्वान्कामानवाप्नोतिआधिव्याधिभयंहरेत् ॥ १८ ॥ गोप्यमेतत्सदाकुर्यान्नसर्व्वत्रप्रकाशयेत्॥ इतिगुह्यतमंशास्त्रम्प्राप्तम्ब्रह्मादिकैःपुरा ॥१९॥ तस्मात्सर्व्वप्रयत्नेनगोपयेत्साधयेत्सुधीः ॥ यत्रैतत्पुस्तकन्तिष्ठेल्लक्ष्मीनारायणात्मकम् ॥ २० ॥ भूतपैशाचवेतालानस्थिरास्तत्रसर्व्वदा॥लक्ष्मीहृदयकम्प्रोक्तंव्विधिनासाधयेत्सुधीः॥२१॥ भृगुवारेचरात्रौचपूजयेत्पुस्तकद्वयम् ॥ सर्व्वस्वंसर्व्वदासत्यङ्गोपयेत्साधयेत्सुधीः ॥ २२ ॥ गोपनात्साधनाल्लोकेधन्योभवतित्त्वतः ॥ २३ ॥ इत्यथर्व्वणरहस्येउत्तरभागेश्रीनारायणहृदयंसम्पूर्णम् ॥ छ ॥ ॥ ॥ ॥

अथोपनिषत्।

॥ कश्यपउवाच ॥ एकशृङ्गवृषासिन्धोवृषाकपेसुरवृषअनादिसम्भवरुद्रकपिल विष्वक्सेन सर्व्वभूतपते ध्रुवधर्म्म वैकुण्ठ वृषावर्त्त अनादिमध्यनिधन धनञ्जय शुचिश्रवः पृश्निते जः निजजय अमृतशय सनातन त्रिधामन् तुषित महातत्त्व लोकनाथ पद्मनाभ विरञ्चे बहुरूप अक्षय अक्षर हव्यभुक् खण्डपरशो शक्र मुञ्जकेश हंस महादक्षिण हृषीकेश सूक्ष्म महानियमधर विरजः लोकप्रतिष्ठ अरूप अग्रज धर्म्मज धर्म्मनाभ हव्यभुक् गभस्तिनाथ शतक्रतुनाथ चन्द्ररथ सूर्य्यतेजःसमुद्रवासः अज सहस्राशिरः सहस्रपाद अयोमुख महापुरुष पुरुषोत्तम सहस्रबाहो सहस्रमूर्त्ते सहस्रास्य सहस्रसम्भव विश्वन्त्वामाहुः ॥ पुष्पहास चरम त्वमेववौषट् वषट्कारस्त्वामाहुरग्यमखेषुप्राशितारम् ॥ शतधारं सहस्रधारं बभूव ॥ भूवन्द्य भूनाथ भृगुपुत्र वेदवेद्य ब्रह्मशय ब्राह्मणप्रिय त्वमेव द्यौरसि मातरिश्वासि धर्म्मोसि होता पोता हन्ता मन्ता नेता होमहेतुस्त्वमेव ॥ अग्र्यश्चधाम्नांत्वमेवऋग्भिः सुभाण्ड इज्योऽसि सुमेधोसि समिधस्त्वमेव मतिर्ग्गतिर्दातात्वमसि मोक्षोऽसि योगोऽसि सृजसि धाता परमयज्ञोऽसि सोमोसि दीक्षितोऽसि दक्षिणासि विश्वमसि ॥ स्थविर हिरण्यगर्भ्भ नारायण त्रिनयन आदिवर्ण्ण आदित्यतेजः महापुरुष पुरुषोत्तम आदिदेव भूमिक्रम त्रिविक्रम प्रभाकर शम्भो स्वयम्भू भूतादिमहाभूतोऽसि ॥ विश्वभूत विश्वंत्वमेव विश्वगोप्तासि पवित्रमसि विश्वभव ऊर्द्धकर्म्मन् अमृत दिवस्पते वाचस्पते घृताच्चैं अनन्तकर्म्मवंशप्राग्वंशधीः त्वमश्वमेधः वरार्त्थिनाञ्वरदोऽसि त्वम् ॥ चतुर्भिश्चचतुर्भिश्चद्वाभ्याम्पञ्चभिरेवच ॥ हूयतेचपुनर्द्वाभ्यान्तुभ्यंहोत्रात्मनेनमः॥ इत्युपनिषत्समाप्ता ॥

अथाष्टोत्तरशतनाम ।

॥ अष्टोत्तरशतन्नाम्नाँव्विष्णोरतुलतेजसः ॥ यस्यश्रवणमात्रेण नरोनारायणोभवेत् ॥ १ ॥ विष्णुर्ज्जिष्णुर्व्वषट्कारोदेवदेवोवृषाकपिः॥दामोदरो दीनबन्धुरादिदेवो दितेस्सुतः॥२॥ पुण्डरीकऽपरानन्दऽपरमात्मापरात्परः॥परशुधारीविश्वात्माकृष्णऽकालीमलापहः ॥३॥ कौस्तुभोद्भासितोरस्को नरोनारायणोहरिः॥ हरो हरप्रियःस्वामी वैकुण्ठो विश्वतोमुखः ॥४॥ हृषीकेशोप्रमेयात्मा वराहोधरणीधरः॥वामनोवेदवक्ताच वासुदेवस्सनातनः॥५॥रामो विरामोविरजो रावणारीरमापतिः ॥ वैकुण्ठवासीवसुमान् धनदोधरणीधरः॥६॥धर्म्मेशो धरणीनाथो ध्येयोधर्म्मभृताँव्वरः॥सहस्रशीर्ष्षापुरुषः सहस्राक्षस्सहस्रपात्॥७॥सर्व्वगःसर्व्ववित्सर्व्वः शरण्यःसाधुवल्लभः ॥ कौसल्यानन्दनश्श्रीमान्रक्षऽकुलविनाशकः ॥ ८ ॥ जगत्कर्त्ता जगद्धर्त्ताजगज्जेता जनार्त्तिहा ॥ जानकीवल्लभोदेवो जयरूपो जलेश्वरः ॥९॥ क्षीराब्धिवासीक्षीराब्धितनयावल्लभस्तथा ॥ शेषशायी पन्नगारिवाहनोविष्टरश्रवाः ॥ ॥१०॥माधवोमथुरानाथो मोहदोमोहनाशनः ॥ दैत्यारिःपुण्डरीकाक्षोह्यच्युतोमधुसूदनः ॥ ११ ॥ सोमसूर्य्याग्निनयनो नृसिंहोभक्तवत्सलः ॥ नित्योनिरामयश्शुद्धोनरदेवोजगत्प्रभुः ॥ १२ ॥ हयग्रीवोजितरिपुरुपेन्द्रोरुक्मिणीपतिः ॥ सर्व्वदेवमयः श्रीशः सर्व्वाधारः सनातनः ॥ १३ ॥ सौम्यःसौम्यप्रदःस्रष्टाविष्वक्सेनोजनार्दनः ॥ यशोदातनयोयोगी योगशास्त्रपरायणः ॥ १४ ॥ रुद्रात्मको रुद्रमूर्त्ती राघवोमधुसूदनः ॥ इतितेकथितन्दिव्यन्नाम्नामष्टोत्तरंशतम् ॥ १५ ॥ सर्व्वपापहरम्पुण्यँव्विष्णोरमिततेजसः ॥ दुःखदारिद्र्यदौर्भाग्यनाशनंसुखव

र्द्धनम् ॥ १६ ॥ सर्व्वसम्पत्करं सौम्यम्महापातकनाशनम् ॥प्रात रुत्थायविप्रेन्द्रपठेदेकाग्रमानसः ॥ तस्यनश्यन्तिविपदां राशयः सिद्धिमाप्नुयात् ॥ १७ ॥ इत्यष्टोत्तरशतनामस्तोत्रंसम्पूर्णम् ॥

अथसहस्रनाम।

श्रीमहादेवउवाच ॥ ब्रह्महत्यासहस्राणाम्पापंशाम्येत्कथञ्च न ॥ नपुनस्त्वय्यविज्ञाते कल्पकोटिशतैरपि ॥ १ ॥ यस्मान्म याकृतास्पर्द्धापवित्रंस्यात्कथंहरे ॥ नश्यन्तिसर्व्वपापानितन्मां वदसुरेश्वर ॥ २ ॥ तदाहदेवोगोविन्दोममप्रीत्यायथायथम् ॥३॥ श्रीभगवानुवाच ॥ सदानामसहस्रम्मे पावनम्मत्पदावहम् ॥ तत्प रोऽनुदिनंशम्भो सर्व्वैश्वर्य्यैर्य्यदीच्छसि ॥ ४ ॥ श्रीमहादेवउवाच॥ तमेवतपसानित्यम्भजामिस्तौमिचिन्तये ॥ तेनाद्वितीयमहि मोजगत्पूज्योऽस्मिपार्व्वति ॥ ५ ॥ श्रीपार्व्वत्युवाच ॥ तन्मेकथ यदेवेशयथाहमयिशङ्कर ॥ शर्व्वेश्वरीनिरुपमातवस्यांसदृशीप्र भो ॥६॥ श्रीमहादेवउवाच ॥ साधुसाधुत्वयापृष्टो विष्णोर्भगवत श्शिवे ॥ नाम्नांसहस्रंवक्ष्यामिमुख्यन्त्रैलोक्यमङ्गलम् ॥ ७ ॥ नारायणायपुरुषोत्तमायचनमोमहात्मने ॥ विशुद्धसत्त्वाधिष्ठायम हाहंसायधीमहि ॥८॥ॐअस्यश्रीविष्णोःसहस्रनाममन्त्रस्यमहा देवऋषिः॥ परमात्मादेवता॥सूर्य्यकोटिप्रतीकाशइतिवीजम् ॥ ग ङ्गातीर्थोत्तमाशक्तिः ॥ प्रपन्नाशानिपञ्जर इतिकीलकम् ॥ वासुदेव म्परम्ब्रह्मइत्यङ्गुष्टाभ्यान्नमः ॥ मूलप्रकृतिरिति तर्ज्जनीभ्यान्नमः ॥ भूमहावराहइतिमध्यमाभ्यान्नमः ॥ सूर्य्यवंशध्वजोरामअनामि काभ्यान्नमः ॥ब्रह्मादिकमलादिगदासूर्य्यकेशवमिति कनिष्टाभ्या न्नमः ॥ शेषइतिकरतलकरपृष्टाभ्यान्नमः ॥ दिव्यास्त्रइत्यस्त्रम् ॥ सर्व्वपापक्षयार्थंसर्व्वाभीष्टसिद्धयर्थं श्रीविष्णोर्न्नामसहस्रजपेवि

नियोगः ॥ अथध्यानम् ॥ विष्णुंभास्वत्किरीटाङ्गदवलयगणाक
ल्पहारोदराङ्घ्रिश्रोणीभूषं सुवक्षोमणिमकरमहाकुण्डलम्मण्डि
तांसम् ॥ हस्तोद्यच्चक्रशङ्खाम्बुजगदममलम्पीतकौशेयवासोविद्यु
द्भासंसमुद्यदिनकरसदृशम्पद्महस्तन्नमामि ॥९॥ॐवासुदेवःपरम्ब्र
ह्मपरमात्मापरात्परम् ॥ परन्धामपरञ्ज्योतिःपरन्तत्वम्परम्पदम्
॥ १० ॥ परंशिवम्परोध्येयःपरंज्ञानम्परागतिः ॥ परमार्थ×
परंश्रेय×परानन्द×परोदयः ॥११॥ परोव्यक्त×परव्योम्योमपरार्द्ध×
परमेश्वरः ॥ निरामयोनिर्व्विकारोनिर्व्विकल्पोनिराश्रयः ॥१२॥
निरञ्जनोनिरालम्बोनिर्ल्लेपोनिरवग्रहः ॥ निर्गुणोनिष्कलोऽन
न्तोचिन्त्योऽसावचलोऽच्युतः ॥१३॥अतीन्द्रियोऽमितोऽरोध्यो
ऽनीहोऽनीशोव्ययोऽक्षयः ॥ सर्व्वज्ञःसर्व्वगःसर्व्वःसर्व्वदःसर्व्वभा
वनः॥१४॥सर्व्वश्शंभुस्सर्व्वसाक्षीपूज्यस्सर्व्वस्यसर्व्वदृक्॥ सर्व्व
शक्तिःसर्व्वसारःसर्व्वात्मासर्व्वतोमुखः ॥१५॥ सर्व्वावासःसर्व्वरू
पः सर्व्वादिस्सर्व्वदुःखहा।सर्व्वार्त्थःसर्व्वतोभद्रःसर्व्वकारणकारण
म्॥१६॥सर्व्वातिशायकःसर्व्वाध्यक्षःसर्व्वेश्वरेश्वरः ॥ षाड्गुंशकोम
हाविष्णुर्म्महागुह्योमहाहरिः ॥१७॥नित्योदितोनित्ययुक्तोनित्या
नन्दःसनातनः॥मायापतिर्य्योगपति×कैवल्यपतिरात्मभूः १८॥
जन्ममृत्युजरातीत×कलातीतोभवातिगः ॥पूर्ण्णस्सत्यश्शुद्धबुद्ध
स्वरूपोनित्यचिन्मयः ॥१९॥ योगिप्रियोयोगमयोभवबन्धैकमो
चकः ॥ पुराण×पुरुषः प्रत्यक्चैतन्यपुरुषोत्तमः ॥२०॥ वेदान्तवे
द्योदुर्ज्ञेयस्तापत्रयविवर्ज्जितः ॥ ब्रह्मविद्याश्रयोऽलङ्घ्यःस्वप्रका
शः स्वयम्प्रभः ॥२१॥सर्व्वोपेयउदासीन×प्रणवस्सर्व्वतस्समः॥
सर्व्वानवद्योदुष्प्रापस्तुरीयस्तमस×परः ॥ २२ ॥ कूटस्थःसर्व्व
संश्लिष्टोवाङ्मनोगोचरातिगः॥सङ्कर्षणः सर्व्वहर×कालः सर्व्व
भयङ्करः ॥२३॥अनुल्लङ्घ्यःसर्व्वगतिर्म्महारुद्रोदुरासदः ॥मूलप्र

कृतिरानन्दःप्रज्ञाताविश्वमोहनः ॥ २४ ॥ महामायोविश्वबीज म्परशक्तिसुखैकभुक् ॥सर्व्वकाम्योऽनन्तशीलस्सर्व्वभूतवशङ्करः ॥ २५ ॥ अनिरुद्धःसर्व्वजीवोहृषीकेशोमनःपतिः ॥ निरु पाधिःप्रियोहंसो क्षरःसर्व्वनियोजकः ॥ २६ ॥ ब्रह्माप्राणे श्वरःसर्व्वभूतभृद्देहनायकः ॥ क्षेत्रज्ञःप्रकृतिस्वामीपुरुषोविश्वसू त्रधृक् ॥ २७ ॥ अन्तर्य्यामीत्रिधामाऽन्तःसाक्षीत्रिगुणईश्वरः ॥ योगिमृग्यःपद्मनाभःशेषशायीश्रियःपतिः ॥ २८ ॥ श्रीसत्यो पास्यपादाब्जोऽनन्तःश्रीःश्रीनिकेतनः ॥नित्यवक्षःस्थलस्थश्रीः श्रीनिधिःश्रीधरोहरिः ॥ २९ ॥ रम्यश्रीर्न्निश्चयश्रीदोविष्णुः क्षीराब्धिमन्दिरः ॥ कौस्तुभोद्भासितोरस्कोमाधवोजगदार्त्ति हा ॥ ३० ॥ श्रीवत्सवक्षानिःसीमःकल्याणगुणभाजनम् ॥ पी ताम्बरोजगन्नाथोजगद्धाताजगत्पिता ॥ ३१ ॥ जगद्बन्धुर्ज्जग त्स्रष्टाजगत्कर्त्ताजगन्निधिः ॥ जगदेकस्फुरद्वीर्य्योनाहव्वादीजग न्मयः ॥ ३२ ॥ सर्व्वाश्चर्य्यमयस्सर्व्वसिद्धार्थः सर्ववीरजित्॥स र्व्वामोघोद्यमोब्रह्मरुद्राद्युत्कृष्टचेतनः ॥ ३३ ॥ शम्भोःपितामहोब्रह्मपितामहाद्यधीश्वरः॥सर्व्वदेवप्रियः सर्व्वदेववृत्तिरनुत्तमः॥ ॥३४॥ सर्व्वदेवैकशरणंसर्व्वदेवैकदैवतम् ॥ यज्ञभुग्यज्ञफलदोय ज्ञेशोयज्ञभावनः ॥ ३५ ॥ यज्ञत्रातायज्ञपुमान्वनमालीद्विज प्रियः॥द्विजैकमानदो हिंस्रःकुलदेवोऽसुरान्तकः ॥ ३६ ॥ स र्व्वदुष्टान्तकृत्सर्व्वसज्जनानन्दपालकः ॥ सर्व्वलोकैकजठरः स र्व्वलोकैकमण्डलः ॥ ३७ ॥ सृष्टिस्थित्यन्तकृच्चक्रीशार्ङ्गधन्वा गदाधरः॥ शङ्खभृन्नन्दकीपद्मपाणिर्ग्गरुडवाहनः ॥३८॥ अनिर्द्देश्यवपुः सर्व्वःसर्व्वलोकैकपावनः ॥ अनन्तकीर्त्तिर्न्निःश्रीशः पौ रुषः सर्व्वमङ्गलः ॥ ३९ ॥ सूर्य्यकोटिप्रतीकाशोयमकोटिविना शनः ॥ ब्रह्मकोटिजगत्स्रष्टावायुकोटिमहाबलः ॥ ४० ॥ कोटी

न्दुजगदानन्दीशम्भुकोटिमहेश्वरः ॥ कुबेरकोटिलक्ष्मीवाञ्छम्भु कोटिविनाशनः ॥ ४१ ॥ कन्दर्प्पकोटिलावण्योदुर्ग्गकोटिवि मर्दनः ॥ समुद्रकोटिगम्भीरस्तीर्थकोटिसमाह्वयः ॥ ४२ ॥ हिमवत्कोटिनिष्कम्पःकोटिब्रह्माण्डविग्रहः ॥ कोट्यश्वमेधपा पघ्नोयज्ञकोटिसमार्च्चनः ॥ ४३ ॥ सुधाकोटिस्वास्थ्यहेतुःकाम धुक्कोटिकामदः ॥ ब्रह्मविद्याकोटिरूपःशिपिविष्टःशुचिश्रवाः ॥ ॥ ४४ ॥ विश्वम्भरस्तीर्थपादःपुण्यश्रवणकीर्त्तनः ॥ आदिदे वोजगज्जैत्रोमुकुन्दःकालनेमिहा ॥ ४५ ॥ वैकुण्ठोऽनन्तमाहा त्म्योमहायोगीश्वरेश्वरः ॥ नित्यतृप्तोनृसद्भावोनिःशङ्कोनरका न्तकः ॥ ४६ ॥ दीनानाथैकशरणँविश्वैकव्यसनापहा ॥ जग त्क्षमाकृतोनित्यःकृपालुःसज्जनाश्रयः ॥ ४७ ॥ योगेश्वरःस दोदीर्ण्णोवृद्धिक्षयविवर्ज्जितः ॥ अधोक्षजोविश्वरेताःप्रजापति समाधिपः ॥ ४८ ॥ शक्रब्रह्मार्च्चितपदःशम्भुब्रह्मोर्द्धधामगः ॥ सूर्य्यसोमेक्षणोविश्वभोक्तासर्व्वस्यपारगः ॥ ४९ ॥ जगत्से तुर्द्धर्म्मसेतुर्द्धरोऽरिष्टधुरन्धरः ॥ निर्म्ममोखिललोकेशोनिःस ङ्गोऽद्भुतभोगवान् ॥ ५० ॥ रम्यमायोविश्वविश्वोविष्वक्सेनो नगोत्तमः ॥ सर्व्वःश्रियःपतिर्देव्याः सर्व्वभूषणभूषितः ॥ ५१ ॥ सर्व्वलक्षणलक्षण्यः सर्व्वदैत्येन्द्रदर्प्पहा॥ समस्तदेवसर्व्वज्ञःसर्व्व दैवतनायकः ॥ ५२ ॥ समस्तदेवतादुर्ग्गः प्रपन्नाशनिपञ्जरः॥स मस्तदेवकवचंसर्व्वदेवशिरोमणिः ॥ ५३ ॥ समस्तभयनिर्भिन्नो भगवान्विष्टरश्रवाः ॥ विभुस्सर्व्वहितोप्यर्कोहतारिःसुरतिप्रदः ॥ ॥ ५४ ॥ सर्व्वदैवतजीवेशोब्राह्मणादिनियोजकः ॥ ब्रह्माशम्भुप राद्धार्द्धचोब्रह्मज्ज्येष्टः शिशुः स्वराट् ॥५५॥ विराड्भक्तपराधीनः स्तुत्यःसर्व्वार्थसाधकः॥सर्व्वार्थकर्त्ताकृत्यज्ञःस्वार्थकृत्यसदो ज्झितः ॥५६॥सदानवस्सदाभद्रःसदाशान्तःसदाशिवः॥सदाप्रि

यःसदातुष्टःसदापुष्टःसदार्च्चितः ॥५७॥ सदापूतःपावनाग्र्योवेदगु
ह्योवृषाकपिः ॥ सहस्रनामात्रियुगश्चतुर्म्मूर्त्तिश्चतुर्भुजः ॥ ५८ ॥
भूतभव्यभवन्नाथोमहापुरुषपूर्व्वजः ॥ नारायणोमुञ्जकेशःसर्व्वयो
गविनिस्सृतः ॥ ५९ ॥ वेदसारोयज्ञसारःसामसारस्तपोनिधिः॥
साध्यश्रेष्ठपुराणर्षिर्पिनिष्ठाशान्तिपरायणः ॥ ६० ॥ शिवस्त्रि
शूलविध्वंसीश्रीकण्ठैकवरप्रदः ॥ नरकृष्णोहरिर्द्धर्म्मनन्दनोधर्म्म
जीवनः ॥६१॥ आदिकर्त्तासर्व्वसत्यःसर्व्वस्त्रीरत्नदर्प्पहा ॥ वि
कालोजितकन्दर्प्पउर्व्वशीहृङ्मुनीश्वरः ॥ ६२ ॥ आद्यकविर्हय
ग्रीवःसर्व्ववागीश्वरेश्वरः ॥ सर्व्वदेवमयोब्रह्मगुरुर्वाग्मीश्वरीपतिः
॥ ६३ ॥ अनन्तविद्याप्रभवोमूलाविद्याविनाशकः ॥ सर्व्वार्ह
णोजगज्जाड्यनाशकोमधुसूदनः ॥ ६४ ॥ अनन्तमन्त्रकोटी
शःशब्दब्रह्मैकपावकः ॥ आदिविद्वान्वेदकर्त्तावेदात्माश्रुतिसा
गरः ॥ ६५ ॥ ब्रह्मार्त्थवेदाभरणःसर्व्वविज्ञानजन्मभूः॥ विद्यारा
जोज्ञानराजोज्ञानसिन्धुरखण्डधीः ॥ ६६ ॥ मत्स्यदेवोमहाशृ
ङ्गोजगद्बीजवहित्रधृक् ॥ लीलाव्याप्तानिलाम्भोधिश्चतुर्व्वेदप्रव
र्त्तकः ॥ ६७ ॥ आदिकूर्म्मोखिलाधारस्तृणीकृतजगद्भवः ॥ अ
मरीकृतदेवौघःपीयूषोत्पत्तिकारणम् ॥ ६८ ॥ आत्माधारोधरा
धारोयज्ञाङ्गोधरणीधरः ॥ हिरण्याक्षहरःपृथ्वीपतिःश्राद्धादिकल्प
कः ॥ ६९ ॥ समस्तपितृभीतिघ्नःसमस्तपितृजीवनम् ॥ हव्यक
व्यैकभुग्भव्योगुणभव्यैकदायकः ॥ ७० ॥ लोमान्तलीनजल
धिःक्षोभिताशेषसागरः ॥ महावराहोयज्ञघ्नध्वंसनोयाज्ञिकाश्रयः
॥ ७१ ॥ नरसिंहोदिव्यसिंहःसर्व्वारिष्टार्तिदुःखहा ॥ एकवीरो
द्भुतबलोयन्त्रमन्त्रैकभञ्जनम् ॥ ७२ ॥ ब्रह्मादिदुःसहज्योतिर्य्यु
गान्ताग्न्यतिभीषणः ॥ कोटिवज्राधिकनखोगजदुष्प्रेक्षमूर्त्तिधृक्
॥ ७३ ॥ मातृचक्रप्रमथनोमहामातृगणेश्वरः ॥ अचिन्त्योमो

घवीर्य्याढ्यःसमस्तासुरघस्मरः ॥ ७४ ॥ हिरण्यकशिपुच्छेदीकालःसङ्कर्षणःपतिः ॥ कृतान्तवाहनःसद्यःसमस्तभयनाशनः ॥ ७५ ॥ सर्व्वविघ्नान्तकःसर्व्वसिद्धिदःसर्व्वपूरकः ॥ समस्तपातकध्वंसीसिद्धमन्त्राधिकाह्वयः ॥ ७६ ॥ भैरवेशोहरार्त्तिघ्नः कालकल्पोदुरासदः ॥ दैत्यगर्भस्रावितामास्फुटब्रह्माण्डवर्जितः ॥ ७७ ॥ स्मृतिमात्राखिलत्राताभूतरूपोमहाहरिः ॥ ब्रह्मचर्म्मशिरःपट्टदिक्पालोऽर्द्धाङ्गभूषणः ॥ ७८ ॥ द्वादशार्कशिरोधामारुद्रशीर्षैकनूपुरः ॥ योगिनीग्रस्तगिरिजारतोभैरवतर्ज्जकः ॥ ७९ ॥ वीरचक्रेश्वरोऽत्युग्रोयमारिःकालसँव्वरः ॥ क्रोधेश्वरोरुद्रचण्डीपरिवादीसुदुष्टभाक् ॥ ८० ॥ सर्व्वाक्षःसर्व्वमृत्युश्चमृत्युर्म्मृत्युनिवर्त्तकः ॥ असाध्यस्सर्व्वरोगघ्नःसर्व्वदुर्ग्रहसौम्यकृत् ॥ ८१ ॥ गणेशकोटिदर्प्पघ्नोदुःसहोऽशेषगोत्रहा ॥ देवदानवदुर्द्धर्षोंजगद्भक्ष्यप्रदःपिता ॥८२॥ समस्तदुर्ग्गतित्राताजगद्भक्षकभक्षकः ॥उग्रेशोऽसुरमार्ज्जारःकालमूषकभक्षकः ॥८३॥ अनन्तायुधदोर्दण्डोनृसिंहोवीरभद्रजित् ॥ योगिनीचक्रगुह्येशःशाकारिःपशुमांसभुक्॥८४॥रुद्रोनारायणोमेषरूपशङ्करवाहनः ॥मेषरूपीशिवत्रातादुष्टशक्तिसहस्रभुक् ॥ ८५ ॥ तुलसीवल्लभोवीरोऽचिन्त्यमायोऽखिलेष्टदः ॥ महाशिवःशिवोरुद्रोभैरवैककपालभृत् ॥८६॥भिल्लश्चक्रेश्वरश्चक्रोदिव्यमोहनरूपधृक् ॥ गौरीसौभाग्यदोमायानिधिर्म्मायाभयापहः ॥८७॥ ब्रह्मतेजोभयोब्रह्मश्रीमयश्चत्रयीमयः ॥ सुब्रह्मण्योबलिध्वंसीवामनोऽदितिदुःखहा ॥८८॥ उपेन्द्रोनृपतिर्विष्णुःकश्यपान्वयमण्डनः ॥ बलिस्वाराज्यदःसर्व्वदेवविप्रात्मदोऽच्युतः ॥ ८९॥ उरुक्रमस्तीर्थपादस्त्रिदशश्चत्रिविक्रमः ॥ व्योमपादःस्वपादाम्भःपवित्रितजगत्त्रयः ॥ ९० ॥ ब्रह्मेशाद्याभिवन्द्याङ्घ्रिर्द्रुतकर्म्माद्रिधारणः ॥ अचिन्त्याद्भुतवि

स्तारोविश्ववृक्षोमहाबलः ॥ ९१ ॥ बहुमूर्द्धापराङ्गच्छिद्भृगुपत्नी शिरोहरः ॥ पापस्तेयःसदापुण्योदैत्येशोनित्यखण्डकः ॥ ९२॥ पूरिताखिलदेवेशोविश्वार्त्थैकावतारकृत् ॥ अमरोनित्यगुप्तात्मा भक्तचिन्तामणिःसदा ॥ ९३ ॥ वरद२कार्त्तवीर्य्यादिराजराज्य प्रदोऽनघः ॥ विश्वश्लाघ्योऽमिताचारोदत्तात्रेयोमुनीश्वरः॥९४॥ परशक्तिसमायुक्तोयोगानन्दमदोन्मदः ॥ समस्तेन्द्रारितेजोहृत्परमानन्दपादपादपः ॥ ९५ ॥ अनसूयागर्भरत्नोभोगमोक्षसुख प्रदः ॥ जमदग्निकुलादित्योरेणुकाद्भुतशक्तिहृत् ॥ ९६ ॥ मातृहत्यावनिर्लेपःस्कन्दजिद्विप्रराज्यदः ॥ सर्व्वक्षत्रान्तकृद्वीरदर्प्पहाकार्त्तवीर्य्यजित् ॥ ९७ ॥ योगीयोगावतारश्चयोगीशोयोगतत्परः ॥ परमानन्ददाताचशिवाचार्य्ययशःप्रदः ॥ ९८ ॥ भीमःपरशुरामश्चशिवाचार्य्यैकविश्वभूः ॥ शिवाखिलज्ञानकोशी भीष्माचार्य्योऽग्निदैवतः ॥ ९९ ॥ द्रोणाचार्य्यगुरुर्व्विश्वजैत्रधन्वाकृतान्तकृत् ॥ अद्वितीयतमोमूर्त्तिर्ब्रह्मचर्य्यैकदक्षिणः ॥ ॥ १०० ॥ मनुश्रेष्ठःसतांसेतुर्म्महीयान्वृषभोविराट् ॥ आदिराजःक्षितिपितासर्व्वरत्नैकदोहकृत् ॥ १०१ ॥ पृथुजन्माद्येकदक्षो ह्रीःश्री२कीर्त्तिःस्वयन्धृतिः ॥ जगद्वृत्तिप्रदश्चक्रवर्त्तिश्रेष्ठोदुरन्धृक् ॥ १०२ ॥ सनकादिमुनिप्रापद्भगवद्भक्तिवर्द्धनः ॥ वर्णाश्रमादिधर्म्माणाङ्कर्त्तावक्ताप्रवर्त्तकः ॥ १०३ ॥ सूर्य्यवंशध्वजोरामोराघवःसद्गुणार्णवः ॥ ककुत्स्थवीरताधर्म्मोराजधर्म्मधुरन्धरः॥१०४॥नित्यसुस्थाशयःसर्व्वभद्रग्राहीशुभैकदृक् ॥ नवरत्नरत्ननिधिःसर्व्वाध्यक्षोमहानिधिः॥१०५॥ सर्व्वश्रेष्ठाश्रयो सर्व्वशास्त्रास्त्रग्रामवीर्य्यवान् ॥ जगद्वशीदाशरथिःसर्व्वरत्नाश्रयो नृपः॥१०६॥धर्म्मःसमस्तधर्म्मस्थोधर्म्मद्रष्टाखिलार्त्तिहृत् ॥ अतीन्द्रोज्ञानविज्ञानपारदश्चाक्षमाम्बुधिः॥१०७॥ सर्व्वप्रकृष्टःशिष्टे

ष्टोहर्षशोकाद्यनाकुलः ॥ पित्राज्ञात्यक्तसाम्राज्यः सपत्नोदय निर्भयः ॥ १०८ ॥ गुहादेशार्पितैश्वर्य्यःशिवस्पर्द्धाजटाधरः ॥ चित्रकूटात्तरत्नाद्रिजगदीशोरणेचरः ॥ १०९ ॥ यथेष्टामोघ शस्त्रास्त्रोदेवेन्द्रतनयाक्षिहा ॥ ब्रह्मेन्द्रादितपैषीको मारीचघ्नोवि राधहा ॥ ११० ॥ ब्रह्मशापहताशेषदण्डकारण्यपावनः ॥ चतु र्दशसहस्राख्यरक्षोघ्नैकशरैकभृत् ॥ १११ ॥ खरारिस्त्रिशिरोह न्ता दूषणघ्नोजनार्दनः ॥ जटायुषोग्निगतिद×कवन्धस्वर्ग्गदाय कः ॥ ११२ ॥ लीलाधनु×कोट्यपास्तदुन्दुभ्यस्थिमहाचयः ॥ सप्ततालव्यथाकृष्टध्वजपातालदानवः ॥११३ ॥ सुग्रीवराज्यदो धीमान् मनसैवाभयप्रदः ॥ हनूमद्वृद्धमुख्येशः समस्तकपिदेहभृ त् ॥ ११४ ॥ अग्निदैवत्यबाणैकव्याकुलीकृतसागरः ॥ सप्ते च्छकोटिबाणैकशुष्कनिर्दग्धसागरः ॥ ११५ ॥ सनागदैत्यधा मैकव्याकुलीकृतसागरः॥ समुद्राद्भुतपूर्व्वैकबद्धसेतुर्य्यशोनिधिः ॥ ११६ ॥ असाध्यसाधको लङ्कासमूलोत्कर्षदक्षिणः॥वरदत्त जनस्थानपौलस्त्यकुलकृन्तनः॥ ११७ ॥ रावणघ्न×प्रहस्तच्छि त्कुम्भकर्णाभिदुग्रहा ॥ रावणैकमुखच्छेत्तानिश्शङ्केन्द्रैकराज्य दः ॥११८॥ स्वर्ग्गास्वर्ग्गत्वविच्छेदीदेवेन्द्रादिन्द्रताहरः ॥ रक्षो देवत्वहृद्धर्म्माधर्म्महर्म्य×पुरुष्टुतः ॥ ११९ ॥ नातिमात्रदशा स्यारिर्दत्तराज्यविभीषणः ॥ सुधासृष्टिमृताशेषस्वसैन्यजीवनैक कृत् ॥ १२० ॥ देवब्राह्मणनामैकधातासर्व्वामरार्च्चितः ॥ ब्रह्मसू र्य्येन्द्ररुद्रादिवन्द्योऽर्च्चितःसताम्प्रियः ॥ १२१ ॥ अयोध्याखि लराज्यार्हस्सर्व्वभूतमनोहरः ॥ स्वाम्यतुल्यकृपादत्तो हीनोत्कृ ष्टैकसत्प्रियः ॥१२२॥ स्वपक्षादिन्यायदर्शी हीनार्थोऽधिकसाध कः ॥ व्याधव्याजानुचितकृत्तावकोऽखिलतुष्टिकृत् ॥ १२३ ॥ पार्व्वत्यधिकयुक्तात्माप्रियात्यक्तसुरारिजित्॥ साक्षात्कुशलवत्स

ञ्चेन्द्राग्निनातोपराजितः ॥१२४॥ कोशलेन्द्रोवीरबाहुः सत्यार्थ स्त्यक्तसोदरः॥यशोदानन्दनोनन्दीधरणीमण्डलोदयः॥१२५॥ ब्रह्मादिकाम्यसान्निध्यसनाथीकृतदैवतः ॥ ब्रह्मलोकात्तचाण्डा लाद्यशेषप्राणिसार्त्थपः ॥ १२६ ॥ स्वर्णीतगर्दभश्वादिचिरायो ध्याबलैककृत् ॥ रामाद्वितीयः सौमित्रिलक्ष्मणप्रहतेन्द्रजित् ॥ ॥ १२७ ॥ विष्णुभक्ताशिवांहःक्षित्पादुकाराज्यनिर्व्वृतः ॥ भर तोऽसह्यगन्धर्व्वकोटिघ्नोलवणान्तकः ॥ १२८ ॥ शत्रुघ्नोवैद्यरा डायुर्व्वेदगम्भौषधीपतिः ॥ नित्यानित्यकरोधन्वन्तरिर्य्यज्ञोजग द्धरः ॥ १२९ ॥ सूर्य्यविघ्नः सुराजीवोदक्षिणेशोद्विजप्रियः॥छिन्न मूर्द्धोपदेशार्कतनूजकृतमैत्रिकः ॥ १३० ॥ शेषाङ्कस्थापितनरः कपिलःकर्दमात्मजः ॥ योगात्मकध्यानभङ्गसगरात्मजभस्म कृत् ॥ १३१ ॥ धर्म्मोविश्वेन्द्रसुरभीपतिः शुद्धात्मभावितः॥श म्भुत्रिपुरदाहैकस्थैर्य्यविश्वरथोद्धतः ॥ १३२ ॥ विश्वात्माशेषरु द्रार्थशिरश्छेदाक्षताकृतिः ॥ वाजपेयादिनामाग्निर्व्वेदधर्म्मपरा यणः ॥ १३३ ॥ श्वेतद्वीपपतिः साङ्ख्यप्रणेतासर्व्वसिद्धिराट् ॥ विश्वप्रकाशितध्यानयोगोमोहतमिस्रहा ॥ १३४ ॥ भक्तशम्भु जितोदैत्यामृतवापीसमस्तपः ॥ महाप्रलयविश्वैकोऽद्वितीयोखि लदैत्यराट् ॥१३५॥ शेषदेवःसहस्राक्षःसहस्राऽङ्घ्रिशिरोभुजः ॥ फणीफणिफणाकारयोजिताभ्यम्बुदक्षितिः॥१३६॥ कालाग्निरुद्र जनकोमुसलास्त्रोहलायुधः ॥ नीलाम्बरोवारुणीशोमनोवाक्काय दोषहा ॥ १३७ ॥ स्वसन्तोषतृप्तिमात्रः पातितैकदशाननः ॥ बलिसँय्यमनोघोरोरौहिणेयः प्रलम्बहा ॥ १३८॥ मुष्टिकघ्नोद्वि विदहाकालिन्दीभेदनोबलः ॥ रेवतीरमण ५ पूर्व्वभक्तिरेवाच्युता ग्रजः ॥ १३९ ॥ देवकीवसुदेवोत्थोऽदितिकश्यपनन्दनः ॥ वा ष्णेयःसात्वतांश्रेष्ठःशौरिर्य्यदुकुलोद्वहः॥१४०॥नराकृति ५ पूर्ण

ब्रह्मसव्यसाचीपरन्तपः॥ ब्रह्मादिकामनानित्यजगत्पर्व्वेतशैशवः ॥ १४१ ॥ पूतनाघ्नःशकटभिद्यमलार्ज्जुनभञ्जनः ॥ वत्सासुरारिरकेशिघ्नोधेनुकारिर्ग्गवीश्वरः ॥१४२॥ दामोदरोगोपदेवोयशोदानन्दकारकः॥कालीयमर्द्दनः सर्व्वगोपगोपीजनप्रियः॥१४३॥ लीलागोवर्द्धनधरोगोविन्दोगोकुलोत्सवः ॥ अरिष्टमथनरकामोन्मत्तगोपीविमुक्तिदः ॥ १४४ ॥ सद्यरकुवलयापीडघातीचाणूरमर्द्दनः॥कंसारिरुग्रसेनादिराज्यस्थाप्यरिहाऽमरः॥१४५॥ सुधर्म्माङ्कितभूलोकोजरासन्धबलान्तकः ॥ त्यक्तभक्तजरासन्धभीमसेनयशरप्रदः ॥ १४६ ॥ सान्दीपनिमृतापत्यदाताकालान्तकादिजित्॥रुक्मिणीरमणोरुक्मिशासनोनरकान्तकृत् १४७ समस्तनरकत्राता सर्व्वभूपतिकोटिजित् ॥ समस्तसुन्दरीकान्तो सुरारिर्ग्गरुडध्वजः ॥ १४८ ॥ एकाकीजितरुद्रार्कमरुदापोऽखिलेश्वरः ॥ देवेन्द्रदर्प्पहाकल्पद्रुमालङ्कृतभूतलः ॥१४९॥ बाणबाहुसहस्रच्छित्स्कन्धाद्रिगणकोटिजित्॥ लीलाजितमहादेवो महादेवैकपूजितः ॥१५०॥ इन्द्रार्त्थार्ज्जुनानिर्ब्भर्त्सुर्ज्जयदरपाण्डवैकधृक्॥काशीराजशिरश्छेत्ता रुद्रशक्त्येकमर्द्दनः ॥१५१॥ विश्वेश्वरप्रसादाढ्यः काशीराजसुतार्द्दनः॥शम्भुप्रतिज्ञापाताच स्वयम्भूगणपूजकः ॥ २५२ ॥ काशीशगणकोटिघ्नो लोकशिक्षाद्विजार्च्चकः शिवतीव्रतपोवश्यःपुराशिववरप्रदः ॥ १५३ ॥ गयासुरप्रतिज्ञाधृक् स्वांशशङ्करपूजकः ॥ शिवकन्याव्रतपतिः कृष्णरूपः शिवारिहा ॥१५४॥ महालक्ष्मीवपुर्ग्गौरीत्राणोदेवलवातहा ॥ विनिद्रमुचुकुन्दैकब्रह्मास्त्रयुवनाश्वहृत् ॥१५५॥ अक्रूरोऽक्रूरमुख्यैकभक्तस्वच्छन्दमुक्तिदः॥ सबालस्त्रीजलक्रीडामृतवापीकृतार्ण्णवः ॥ १५६ ॥ यमुनापतिरानीतपरिणीताद्विजात्मकः ॥ श्रीदामशङ्खभक्तार्त्थभूम्यानीतेन्द्रभैरवः ॥ १५७ ॥ दुर्व्वृत्ताशिशु

पालैकमुक्तिकोद्धारकेश्वरः ॥ आचाण्डालादिकम्प्राप्यद्वारका निधिकोटिकृत् ॥१५८॥ ब्रह्मास्त्रदग्धगर्भस्थपरीक्षिज्जीवनैककृत् ॥ परिणीतद्विजसुतानेतार्ज्जुनमदापहः ॥ १५९ ॥ गूढमुद्राकृतिग्रस्तभीष्माद्यखिलगौरवः ॥ पार्त्थार्त्थखण्डिताशेषदिव्यास्त्रःपार्त्थमोहभृत् ॥१६०॥ ब्रह्मशापच्छलध्वस्तयादवो विभवावहः ॥ अनङ्गोजितगौरीशोरतिकान्तःसदेप्सितः ॥१६१॥ पुष्पेषुर्व्विश्वविजयीस्मरःकामेश्वरीपतिः ॥ उषापतिर्व्विश्वहेतुर्व्विश्वतृप्तोऽधिपूरुषः ॥ १६२ ॥ चतुरात्माचतुर्व्वर्ण्यश्चतुर्व्वेदविधायकः॥चतुर्व्विश्वैकविश्वात्मा सर्व्वोत्कृष्टासुकोटिषु ॥१६३॥ आश्रयात्मा पुराणर्षिर्व्व्यासःशास्त्रसहस्रकृत्॥महाभारतनिर्म्माताकवीन्द्रोबादरायणः ॥१६४॥ कृष्णद्वैपायनः सर्व्वपुरुषार्त्थकबोधकः ॥ वेदान्तकर्त्ता ब्रह्मैकव्यञ्जकःपुरुवंशकृत् ॥१६५॥ बुद्धोध्यानजिताशेषदेववदेवोजगत्प्रियः ॥ निरायुधोजगज्जैत्रः श्रीधनोदुष्टमोहनः ॥ १६६ ॥ दैत्यदेवबहिष्कर्त्ता वेदार्त्थश्रुतिगोपकः ॥ शुद्धोदनिर्न्नष्टदिष्टः सुखदःसदसत्पतिः ॥ १६७ ॥ यथायोग्याखिलकृपःसर्व्वशून्योऽखिलेष्टदः ॥ चतुष्कोटिपृथक्तत्त्वंप्रज्ञापारमितेश्वरः ॥ १६८ ॥ पाषण्डश्रुतिमार्ग्गेण पाषण्डश्रुतिगोपकः॥कल्कीविष्णुयशःपुत्रःकलिकालविलोपकः ॥१६९॥ समस्तम्लेच्छहस्तघ्नःसर्व्वशिष्टद्विजातिकृत् ॥ सत्यप्रवर्त्तकोदेवद्विजदीर्घक्षुधापहः ॥१७० ॥ अश्वरावादिवेदेनपृथ्वीदुर्ग्गतिनाशनः ॥ सद्यःक्ष्मानन्तलक्ष्मीकृन्नष्टनिःशेषधर्म्मकृत् ॥ १७१ ॥ अनन्तस्वर्ग्गयागैकहेमपूर्णाखिलद्विजः ॥ असाध्यैकजगच्छास्ताविश्ववन्द्योजयध्वजः ॥ १७२ ॥ आत्मातत्त्वाधिपःकर्त्ता श्रेष्ठोविधिरुमापतिः॥ भर्त्तुःश्रेष्ठःप्रजेशाग्र्योमरीचिजनकाग्रणीः ॥ १७३ ॥ कश्यपोदेवराडिन्द्रःप्रह्लादोदैत्यराट्शशी ॥ नक्षत्रे

शोरविस्तेजःश्रेष्ठःशुक्रःकवीश्वरः ॥ १७४ ॥ महर्षिराड्भृगुर्विष्णुरादित्येशोवलिःस्वराट् ॥ वायुर्व्वह्निः शुचिःश्रेष्ठःशङ्करोरुद्रराड्गुरुः ॥ १७५ ॥ विद्वत्तमश्चित्ररथो गन्धर्व्वाग्र्यो वसूत्तमः ॥ वर्ण्णादिरग्र्यास्त्रीगौरीशक्त्यग्र्याश्रीश्चनारदः ॥ १७६ ॥ देवर्षिराट्पाण्डवाग्र्योऽर्ज्जुनोनारदवादराट् ॥ पवनः पवनेशानोवरुणोयादसाम्पतिः ॥ १७७ ॥ गङ्गातीर्थोत्तमोद्भूतश्छत्रकाग्र्यव्वँरौषधम् ॥ अन्नंसुदर्शनास्त्राग्र्योवज्रप्रहरणोत्तमम् ॥ १७८ ॥ उच्चैःश्रवावाजिराजऐरावतइभेश्वरः ॥ अरुन्धत्येकपत्नीशोह्यश्वत्थोऽशेषवृक्षराट् ॥ १७९ ॥ अध्यात्मविद्याविद्यात्मा प्रणवश्छन्दसाव्वँरः ॥ मेरुर्ग्गिरिपतिर्म्माग्गों सामाग्र्यःकालसत्तमः ॥ १८० ॥ दिनाद्यात्मा पूर्वसिद्धिः कपिलः सामवेदराट् ॥ तार्क्ष्यःखगेन्द्र ऋत्वग्र्योवसन्तः कल्पपादपः ॥ १८१ ॥ दातृश्रेष्ठःकामधेनुरार्त्तिघ्नाग्र्यःसुरोत्तमः ॥ चिन्तामणिर्ग्गुरुश्रेष्ठो माताहिततमःपिता ॥ १८२ ॥ सिंहोमृगेन्द्रोनागेन्द्रोवासुकिर्भूधरोनृपः॥ वर्णेशोब्राह्मणश्चान्तःकरणाग्र्यन्नमोनमः ॥ १८३ ॥ इत्येतद्वासुदेवस्यविष्णोर्न्नामसहस्रकम् ॥ सर्व्वापराधशमनम्परम्भक्तिविवर्द्धनम् ॥ १८४ ॥ अक्षयब्रह्मलोकादिसर्व्वार्त्थाप्त्यैकसाधनम् ॥ विष्णुलोकैकसोपानं सर्व्वदुःखविनाशनम् ॥ १८५ ॥ समस्तसुखदं सत्यम्परन्निर्व्वाणदायकम् ॥ कामक्रोधादिनिःशेषमनोमलविशोधनम् ॥ १८६ ॥ शान्तिदम्पावनन्नृणाम्महापातकिनामपि ॥ सर्व्वेषाम्प्राणिनामाशुसर्व्वाभीष्टफलप्रदम् ॥ १८७ ॥ सर्व्वविघ्नप्रशमनंसर्व्वारिष्टविनाशनम् ॥ घोरदुःखप्रशमनन्तीव्रदारिद्र्यनाशनम् ॥ १८८ ॥ तापत्रयापहङ्कुबन्धनधान्ययशस्करम् ॥ सर्व्वैश्वर्य्यप्रदंसर्व्वासिद्धिदंसर्व्वकालदम् ॥ १८९ ॥ तीर्त्थयज्ञतपोदानव्रतकोटिफल

प्रदम्॥ अप्रज्ञजाड्यशमनंसर्व्वविद्याप्रवर्त्तकम् ॥ १९० ॥ राज्यदंराज्यकामानांरोगिणांसर्व्वरोगनुत् ॥ वन्ध्यानांसुतदञ्चा शुसर्व्वश्रेष्ठफलप्रदम् ॥ १९१ ॥ अस्त्रग्रामविषध्वंसिग्रहपीडावि नाशनम्॥माङ्गल्यम्पुण्यमायुष्यंश्रवणात्पठनाज्जपात् ॥ १९२ ॥ सकृदस्याखिलावेदाःसाङ्गामन्त्राश्चकोटिशः ॥ पुराणशास्त्रंस्मृ तयःपठिताऽपाठितास्तथा ॥ १९३ ॥ जप्त्वास्यश्लोकंश्लोका र्द्धम्पादंव्वापठतऽप्रिये ॥ नित्यंसिद्ध्यतिसर्व्वेषामचिरात्किमु तोऽखिलम् ॥ १९४ ॥ प्राणेनसदृशंसद्यऽप्रत्यहंसर्व्वकर्म्मसु ॥ इदम्भद्रेत्वयागोप्यम्पाठ्यंस्वार्थैकसिद्धये ॥ १९५ ॥ नावैष्ण वायदातव्यँव्विकल्पोपहतात्मने ॥ भक्तिश्रद्धाविहीनायविष्णु सामान्यदर्शिने ॥ १९६ ॥ देयम्पुत्रायशिष्यायशुद्धायहित काम्यया॥मत्प्रसादादृतेनेदङ्ग्रहीष्यन्त्यल्पमेधसः॥१९७॥ कलौ सद्यऽफलङ्कल्पग्राममेष्यतिनारद ॥ लोकानाम्भाग्यहीनानाँय्ये नदुऽखँव्विनश्यति॥१९८॥ क्षेत्रेषुवैष्णवेष्वेतदार्य्यावर्त्तेभविष्य ति ॥ नास्तिविष्णोऽपरंसत्यन्नास्तिविष्णोऽपरम्पदम् ॥१९९॥ नास्तिविष्णोऽपरंज्ञानन्नास्तिमोक्षोह्यवैष्णवः ॥ नास्तिविष्णोऽ परोमन्त्रोनास्तिविष्णोऽपरन्तपः ॥ २०० ॥ नास्तिविष्णोऽपर न्ध्यानन्नास्तिमन्त्रोह्यवैष्णवः ॥ किन्तस्यबहुभिर्म्मन्त्रैऽकिञ्चपै र्ब्बहुविस्तरैः ॥ २०१ ॥ वाजपेयसहस्रैऽकिंभक्तिर्य्यस्यजनार्दने ॥ सर्व्वतीर्थमयो विष्णुःसर्व्वशास्त्रमयऽप्रभुः ॥ २०२ ॥ स र्व्वक्रतुमयोविष्णुःसत्यंसत्यँव्वदाम्यहम् ॥ आत्रह्मसारसर्व्वस्वं सर्व्वमेतन्मयोदितम् ॥ २०३ ॥ श्रीपार्व्वत्युवाच॥ धन्यास्म्यनु गृहीतास्मिकृतार्थास्मिजगद्गुरो ॥ यन्मयेदंश्रुतंस्तोत्रंत्वद्ग्रह स्यंसुदुर्ल्लभम् ॥ २०४ ॥ अहोवतमहत्कष्टंसमस्तसुखेदहरौ ॥ विद्यमानेऽपि सर्व्वेशे मूढाऽक्लिश्यन्तिसंसृतौ ॥ २०५ ॥

यमुद्दिश्य सदानाथो महेशोपिदिगम्बरः ॥ जटिलोभस्मलिं
ताङ्गस्तपस्वीवीक्षितोजनैः ॥ २०६ ॥ अतोऽधिकोनदेवोऽ
स्तिलक्ष्मीकान्तान्मधुद्विषः ॥ यत्तत्त्वञ्चिन्त्यतेनित्यन्तवया
योगीश्वरेणहि ॥ २०७ ॥ अतःपरङ्किमधिकम्पदंश्रीपुरुषो
त्तमात् ॥ तमविज्ञायतान्मूढायजन्तेज्ञानमानिनः ॥ २०८ ॥
मुषितास्मित्वयानाथचिरँय्यदयमीश्वरः ॥ प्रकाशितोनमेयस्य
दत्ताद्या दिव्यशक्तयः ॥ २०९ ॥ अहोसर्व्वेश्वरोविष्णुः सर्व्व
देवोत्तमोत्तमः ॥ भवदादिगुरुम्मूढैः सामान्य इवलक्ष्यते ॥
॥ २१० ॥ महीयसां हि माहात्म्यम्भजमानान्भजन्ति चेत् ॥
द्विषतोऽपितथापापानुपेक्ष्यन्तेक्षमालयाः ॥ २११ ॥ मयापिवा
ल्येस्वपितुःप्रज्ञाह्रद्याबुभुक्षिताः॥दुःखादशक्ताःस्वम्पोष्टुंश्रिया
नाध्यासिताःपुरा ॥ २१२ ॥ त्वयासँव्वर्द्धिताभिश्चप्रजाभिर्व्वि
बुधादयः ॥ विशसद्भिःस्वशक्त्याद्याःससुहृन्मित्रबान्धवाः ॥
॥२१३॥ त्वयाविनाकदेवत्वङ्कथैय्यँकपरिग्रहः॥ सर्व्वेभवन्ति
जीवन्तोयातनाः शिरासिस्थिताः ॥२१४॥ तामृतेनैवधर्म्मार्त्थौ
कामोमोक्षोऽपिदुर्ल्लभः ॥ क्षुधितानान्दुर्ग्गतानाङ्कतोयोगसमाध
यः ॥ २१५ ॥ साचसंसारसरिकासर्व्वलोकैकपालिका ॥ वश्या
साकमलायस्यत्यक्त्वात्वामपिशङ्कर ॥ २१६ ॥ श्रियाधर्म्मेण
शौर्य्येणरूपेणार्ज्जवसम्पदा ॥ सर्व्वातिशयवीर्य्येणसम्पूर्णस्यम
हात्मनः ॥ २१७ ॥ कस्तेन तुल्यतामेतिदेवदेवेनविष्णुना ॥
यस्यांशांशकभागेनविनासर्व्वंव्विलीयते ॥ २१८ ॥ जगदेतत्त
थाप्राहुर्दोषायेतद्विमोहिता ॥ नास्यजन्मजरामृत्युर्न्नाप्राप्यँव्वा
र्त्थमेववा ॥ २१९ ॥ तथापिकुरुतेधर्म्मान्पालनायसताङ्कृते ॥
विज्ञापयमहादेवम्प्रणम्यैकम्महेश्वरम् ॥ २२० ॥ अवधार्य्यत
थासाहंकान्तकामदशाश्वत ॥ कामाद्यासक्तचित्तत्वात्किन्तुस

र्व्वेश्वरप्रभो ॥ २२१ ॥ त्वन्मयत्वात्प्रसादाद्वाशक्नोमिपठितुन्नचेत् ॥ विष्णोस्सहस्रनामैतत्प्रत्यहंवृषभध्वज ॥ नाम्नैकेनतुयेन स्यात्तत्फलम्ब्रूहिमेप्रभो ॥ २२२ ॥ श्रीमहादेवउवाच ॥ राम रामेतिरामेतिरमेरामेमनोरमे ॥ सहस्रनामभिस्तुल्यंरामनामवरानने ॥ २२३ ॥ अतःसर्व्वाणितीर्थानिजलञ्चैवप्रयागजम् ॥ विष्णोर्न्नामसहस्रस्यकलान्नार्हन्तिषोडशीम् ॥२२४ ॥ इति नारदपञ्चरात्रोक्तश्रीविष्णोर्न्नामसहस्रं समाप्तम् ॥

इति विष्णुतन्त्रं समाप्तम्।

इति श्रीशाक्तप्रमोदस्समाप्तः।

कालीध्यानं तदुक्तं परमिह लिखितं चित्रिताङ्गञ्च काल्या यन्त्रोद्धारस्सयन्त्रोमनुरपि कथितः सोद्धृतिःपूजनञ्च ॥ सङ्क्षिप्तंचाप्यनल्पंस्तुतिरपिकथिताचापराधार्द्दनीच नाम्नांसाहस्रमुक्तं शतमुपनिषदावर्म्महृच्चोक्तमत्र ॥ १ ॥ तारायाश्चपूजनंस्तोत्रमिह हि गदितंवँवर्म्म चोक्तंवँवरेण्यं तत्पश्चाद्धृत्समुक्तं परमुपनिषदष्टोत्तरम्पूतनाम्नाम् ॥ यत्नात्प्रोक्तन्तदीयंशतमिहशुभदन्तत्सहस्रञ्चरम्यन्तारारूपन्तमोघ्नन्त्वरितफलकरंषोडशीयन्तथैव ॥ २ ॥ लक्ष्म्यालालित्ययुक्तंसकलमपितथासूक्तमत्राधिकञ्चधूमाधर्म्मार्त्तयुक्तन्तदिहचभुवनाभक्तिदञ्छिन्नमस्ता ॥ शत्रुच्छेदप्रदन्तद्बलयुतवगलाबुद्धिदम्भैरवीयम्मातङ्ग्या माननीयंयजनमथनुतिर्व्वर्म्महृत्प्रोक्तमत्र॥३॥ नाम्नामष्टोत्तरंयच्छतमिहलिखितन्तत्सहस्रम्परञ्चपूजाप्रोक्ताकुमार्य्याःस्तुतिरपिकथितावर्म्मतत्तर्प्पणञ्च ॥ होमोदानम्बलेश्चप्रचरितमिह वैशोभिशाक्तप्रमोदे प्राप्तेदौर्लभ्यमे

षामिहतुसमुदितंसर्व्वमेकत्रलभ्यम् ॥ ४ ॥ ध्यानन्तदुक्तञ्चित्रञ्च यन्त्रमन्त्रौ च कीर्त्तितौ ॥ सोद्धारो दशविद्यानामस्मिञ्छाक्तप्र मोदके ॥ ५ ॥ विष्णोर्द्धर्चानं साचित्रय्यँयजनविधिरपि स्तोत्रम स्मिन्सवर्म्म हृत्प्रोक्तञ्चापियुक्तंसमसुपनिषदाष्टोत्तरन्नामतस्य ॥ मन्त्रोग्रन्देवगोप्यंशतमिह लिखितञ्चापिनाम्नांसहस्रं सोद्धारौ य न्त्रमन्त्रावहृदयमखिलन्तादृशन्तच्चदेव्याः ॥६॥ एतत्सर्व्वङ्गणेशे श्वरहृदयविहीनं समुक्तं सदास्मिन्मार्त्तण्डस्यापि तादृक्सकलमि हपरं हृच्चसूक्तेन युक्तम् ॥ नास्त्यस्मिंस्तस्य चोग्रोपनिषदवग ता बोद्धव्यमेतद्विचित्रं सर्व्वन्तूपात्तमस्मिन्सकलबुधजनैर्य्यद्य थास्थानलब्धम् ॥ ७ ॥ षड्वेदाङ्केन्दु १९४६ युक्तेशरादिवि धुदिनेसत्तिथौषण्मुखस्य अक्षेपक्षे सुमासेजयसुखशुभदेमाधवेमा नवानाम् ॥ ग्रन्थः शाक्तप्रमोदोगमदयमखिलः सम्प्रदेशःसमा प्तिं श्रीदेवैर्न्नन्दनान्तैर्न्नृपकुलकमलाहस्करैःसुप्रणीतः ॥ ८ ॥

इति ग्रन्थस्य विषयाः समाप्ताः ।



खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालय-बंबई.